**Roll No. ..............................**

# E–3382

## B. A. (Classics) (Part II)

## EXAMINATION, 2021

**(Compulsory)**

Paper First

SAHITYAM

*Time : Three Hours* ] [ *Maximum Marks : 75*

सूचना : सर्वे प्रश्नाः समाधेयाः।

1. कयोश्चित् द्वयोः श्लोकयोः सप्रसङ्गं व्याख्या कार्या— 20

(i) मुक्तेषु रश्मिषु निरायतपूर्वकाया
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः॥

(ii) नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरुणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलमिदः सूच्यन्त एवोफलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोया धारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः॥

(iii) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्य वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥

(iv) शुश्रूषस्व गुरून् कुरु प्रियसखीवृप्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥

2. अभिज्ञानशाकुन्तलमधिकृत्य नायकस्य चरित्रचित्रणं क्रियताम्। 10

अथवा

अभिज्ञानशाकुन्तले प्रकृति-चित्रणं क्रियताम्।

3. गद्यसाहित्ये हर्षचरितस्य वैशिष्ट्यं विलिख्यताम्। 10

अथवा

हर्षचरितस्य द्वितीयोच्छ्वासस्य कथासारः लेख्यः।

4. कस्यचिदैकस्य गद्यांशस्य व्याख्या कार्या— 10

(अ) एवमनुश्रूयते-पुरा किल भगवान्स्वलोकमधितिष्ठन्परमेष्ठी विकासिन पद्मविष्ठरे समुपविष्टः सुनासीर प्रमुखैर्गीर्वाणैः परिवृतो ब्रह्ममोद्याः कथाः कुर्वन्नन्याश्च निरवद्या विद्यागोष्ठी भवियन्कदाचिदा-साञ्चक्रे। तथासीनं च तं त्रिभुवनप्रतीक्ष्यं मनुदक्षचाक्षुषप्रभृतयः प्रजापतयः सर्वे च सप्तर्षिपुरःसरा महर्षयः सिषेविरे। केचिदृचः स्तुतिचतुराः समुदचारयन्। केचिदपचितिभाञ्जि यजूंष्यपठन्। केचित्प्रशंसा-सामानि सामानि जगुः। अपरे विवृतक्रतुक्रिया-तन्त्रान्मन्त्रान्त्याचचक्षिरे। विद्याविसंवादकृताश्च तत्र तेषामन्योन्यस्य विवादाः प्रादुरभवन्।

(ब) अथ सारस्वतो मातुर्महिम्ना यौवनारम्भ एताविर्भूताशेषविद्यासंभारस्तस्मिन्सवयांस भ्रातरि प्रेयसि प्राणसमे सुहृदि वत्से वाङ्मयं समस्तमेव संचारयामास। चकार च कृतदार-परिग्रहस्यास्य तस्मिन्नेव प्रदेशे प्रीत्या प्रीतिकूटनामानं निवासम्। आत्मनाप्याषाढो, कृष्णाजिनी, अक्षवलयी, वल्कली, मेखली, जटी च भूत्वा तपस्यतो जनयितुरेव जगामान्तिकम्।

5. कयोश्चित् द्वयोः संक्षिप्तपरिचयः प्रस्तूयताम्— 10

(i) स्वप्नवासवदत्तम्

(ii) उत्तररामचरितम्

(iii) कादम्बरी

6. द्वयोः नाटकयोः वैशिष्ट्यं प्रतिपाद्यताम्— प्रत्येक $7\frac{1}{2}$

(i) अभिज्ञानशाकुन्तलम्

(ii) विक्रमोर्वशीयम्

(iii) नागानन्दम्

(iv) उरुभङ्गम्

(v) वेणीसंहारम्।